# आनन्दलहरी

भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः
प्रजाना मीशान स्त्रिपुर मथनः पञ्चभि रपि ।
न षड्भिः सेनानी र्दश शत मुखैरप्यहिपतिः
तदान्येषां केषां कथय कथमस्मि न्नवसरः ॥ १॥

घृत क्षीर द्राक्षा मधु मधुरिमा कैरपि पदैः
विशिष्या नाख्येयो भवति रसनामात्र विषयः ।
तथा ते सौन्दर्यं परमशिव दृङ्मात्र विषयः
कथंकारं ब्रूमः सकल निगमागोचर गुणे ॥ २॥

मुखे ते ताम्बूलं नयन युगळे कज्जलकला
ललाटे काश्मीरं विलसति गळे मौक्तिक लता ।
स्फुरत्काञ्ची शाटी पृथु कटितटे हाटकमयी
भजामि त्वां गौरीं नगपति किशोरी मविरतम् ॥ ३॥

विराजन्मन्दार द्रुम कुसुम हार स्तनतटी
नदद्वीणा नाद श्रवण विलस त्कुण्डल गुणा
नताङ्गी मातङ्गी रुचिरगति भङ्गी भगवती
सती शम्भो रम्भोरुह चटुल चक्षु र्विजयते ॥ ४॥

नवीनार्क भ्राज न्मणिकनक भूषा परिकरैः
वृताङ्गी सारङ्गी रुचिर नयनाङ्गीकृत शिवा ।
तडित्पीता पीताम्बर ललित मञ्जीर सुभगा
ममापर्णा पूर्णा निरवधि सुखै रस्तु सुमुखी ॥ ५॥

हिमाद्रेः संभूता सुललित करैः पल्लव युता
सुपुष्पा मुक्ताभि र्भ्रमर कलिता चालक भरैः ।
कृतस्थाणु स्थाना कुचफल नता सूक्ति सरसा
रुजां हन्त्री गन्त्री विलसति चिदानन्द लतिका ॥ ६॥

सपर्णा माकीर्णां कतिपय गुणैः सादर मिह
श्रयन्त्यन्ये वल्लीं मम तु मतिरेवं विलसति ।
अपर्णैका सेव्या जगति सकलै र्यत्परिवृतः
पुराणोऽपि स्थाणुः फलति किल कैवल्य पदवीम् ॥ ७॥

विधात्री धर्माणां त्वमसि सकलाम्नाय जननी
त्वमर्थानां मूलं धन दनमनीयांघ्रि कमले ।
त्वमादिः कामानां जननि कृत कन्दर्प विजये
सतां मुक्तेर्बीजं त्वमसि परम ब्रह्ममहिषी ॥ ८॥

प्रभूता भक्तिस्ते यदपि न ममालोल मनसः
त्वया तु श्रीमत्या सदय मवलोक्योऽह मधुना ।

पयोदः पानीयं दिशति मधुरं चातक मुखे
भृशं शङ्के कैर्वा विधिभि रनुनीता मम मतिः ॥ ९॥

कृपापाङ्गालोकं वितर तरसा साधु चरिते
न ते युक्तोपेक्षा मयि शरण दीक्षा मुपगते ।
न चेदिष्टं दद्या दनुपद महो कल्पलतिका
विशेषः सामान्यैः कथ मितरवल्ली परिकरैः ॥ १०॥

महान्तं विश्वासं तव चरण पङ्केरुह युगे
निधायान्यन्नैवा श्रितमिह मया दैवत मुमे ।
तथापि त्वच्चेतो यदि मयि न जायेत सदयं
निरालम्बो लम्बोदर जननि कं यामि शरणम् ॥ ११॥

अयः स्पर्शे लग्नं सपदि लभते हेमपदवीं
यथा रथ्यापाथः शुचि भवति गंगौघ मिलितम् ।
तथा तत्तत्पापै रतिमलिन मन्त र्मम यदि
त्वयि प्रेम्णासक्तं कथमिव न जायेत विमलम् ॥ १२॥

त्वदन्यस्मा दिच्छा विषय फल लाभे न नियमः
त्वमर्थाना मिच्छा धिकमपि समर्था वितरणे ।
इति प्राहुः प्राञ्चः कमलभव नाद्यास्त्वयि मनः
त्वदासक्तं नक्तं दिवमुचित मीशानि कुरु तत् ॥ १३॥

स्फुरन्नानारत्न स्फटिकमय भित्ति प्रतिफलत्
त्वदाकारं चञ्चच्छशधर कला सौध शिखरम् ।
मुकुन्द ब्रह्मेन्द्र प्रभृति परिवारं विजयते
तवागारं रम्यं त्रिभुवन महाराज गृहिणि ॥ १४॥

निवासः कैलासे विधि शतमखाद्याः स्तुतिकराः
कुटुम्बं त्रैलोक्यं कृतकरपुटः सिद्धि निकरः ।
महेशः प्राणेश स्तदवनि धराधीश तनये
न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥ १५॥

वृषो वृद्धो यानं विषमशन माशा निवसनं
श्मशानं क्रीडाभू र्भुजग निवहो भूषण विधिः
समग्रा सामग्री जगति विदितैव स्मररिपोः
यदेतस्यैश्वर्यं तव जननि सौभाग्य महिमा ॥ १६॥

अशेष ब्रह्माण्ड प्रलय विधि नैसर्गिक मतिः
श्मशानेष्वासीनः कृत भसित लेपः पशुपतिः ।
दधौ कण्ठे हालाहल मखिल भूगोल कृपया
भवत्याः संगत्याः फलमिति च कल्याणि कलये ॥ १७॥

त्वदीयं सौन्दर्यं निरतिशय मालोक्य परया

भियैवासी द्गंगा जलमय तनुः शैल तनये ।
तदेतस्या स्तस्मा द्वदन कमलं वीक्ष्य कृपया
प्रतिष्ठा मातन्व न्निज शिरसि वासेन गिरिशः ॥ १८॥

विशाल श्रीखण्ड द्रव मृगम दाकीर्ण घुसृण
प्रसून व्यामिश्रं भगवति तवाभ्यङ्ग सलिलम् ।
समादाय स्रष्टा चलित पद पांसू न्निजकरैः
समाधत्ते सृष्टिं विबुधपुर पङ्केरुह दृशाम् ॥ १९॥

वसन्ते सानन्दे कुसुमित लताभिः परिवृते
स्फुरन्नानापद्मे सरसि कलहंसालि सुभगे ।
सखीभिः खेलन्तीं मलय पवनान्दोलित जले
स्मरेद्यस्त्वां तस्य ज्वर जनित पीडापसरति ॥ २०॥

॥ इति श्रीमच्छङ्कराचार्य विरचिता आनन्दलहरी सम्पूर्णा ॥